
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

M-1938

~~M-1913~~

दाखल क्र M 1938 विषय ज्योतिष्यशास्त्र.

नाव. जातकाभरणम् (पद्धतिभूषणटीका सहितम्).

लेखक/लिपीकार सोमदेव

पृष्ठ 44 काळ शके 1731 पूर्ण/~~अपूर्ण~~

जातकाभरणम् (ज्योतिष)

श्रीगणेशायनमः॥कलितकलितकालव्यालमालंलसल्लोलज्वलितशशीकलंसत्कुंडलग्नालिमालं॥
पृथुललपनचंचच्चुडसीदूरलेपंरतिपतिरिपुशालंकेवलंभाषयामि॥१॥आश्वलायनपतिःश्रु
तिवेत्तीत्रिशिष्यपंक्तिमतिवर्द्धनकर्त्ता॥मद्गुरुर्गणककैवरसोमासन्मतिर्जगति — ससोमः॥२॥
विद्यमानदरखानदेशचिलसस्थमालयाधिष्ठितःश्रीलंबोदरसन्निधौसुरुचिरोवेरंउवल्लीपुरे॥ज्ञा
लौ[र्दी]युकगुर्जरेषुनितरांमान्योगणेशाभीयोव्यासोपाख्यउदारधीर्विजयतेश्रीमान्मुरारिर्द्विजः॥३
धनुर्भुजेननन्तर्ज्जेनठीकापद्धतिभूषणे॥क्रियतेपंथकृत्सोम जन्मोदाहरणान्विते॥४॥इहशास्त्रेका
निसंबंधाभिधेयंप्रयोजनानिभवंतीसूच्यते॥उपायोपेयउपलक्षणःसंबधःउपायोस्त्विदंशास्त्रमुपेयो ज्ञा
(धनरूप) ज्ञानं॥ननोन्नतादिमभिधेयं॥लोकानामायुर्दायव्यंजकत्वंप्रयोजनं॥किमेभिरुक्तैरिसुच्यते॥
यस्माद्विदुषांसंबधादिकथनाच्छास्त्रविषयिनीप्रवृत्तिरुत्पद्यते॥तथाचोक्तं॥सिद्धिःश्रोतुःप्र
वृत्तीनांसंबंधकथनाद्यतः॥तस्मात्सर्वेषुशास्त्रेषुसंबधःसद्भिरुच्युते॥१॥किमत्राभि
धेयंस्यादितिपृष्टस्तुकेनचित्॥यदिनप्रोच्यतेतस्मैफलंशून्यंतुतद्भवेत्॥२॥सर्वस्यैवतु

शास्त्रस्य कर्मणो वापि कस्यचित्॥ प्राग्रत्र योजनोक्तं यावत्केन प्रयुक्तेत इति॥ अस्मिन्शास्त्रे क
स्याधिकारस्तदुच्यते॥ शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषां [illegible]गानि॥ छंदसां लक्षणं [illegible] चैव
षडंगो वेद उच्यते॥ ननु कुतो ज्योतिःशास्त्रस्य वेदांगत्वं तदुच्यते॥ सूर्यचंद्रग्रहणसंक्रमणव्य
तीपातादिपुण्यकालकथनात्॥ यज्ञादीनां कालव्यंजकत्वादस्य वेदांगत्वमेव॥ तथा चोक्तं सिद्धां
तशिरोमणौ॥ वेदास्तावद्यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण॥ शास्त्रादस्मात्कालबोधो
यतः स्याद्वेदांगत्वं ज्योतिषस्योक्तमस्मात्॥१॥ शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं
कल्पं करौ॥ या तु शिक्षास्तु वेदस्य सा नासिका पादपद्मद्वयं छंद आद्यैर्बुधैः॥२॥ वेदचक्षुः किलेदं
स्मृतं ज्योतिषं मुख्यता सांगमध्येंऽत एवोच्यते॥ संयुतोपीतरैः कर्णनासादिभिश्चक्षुषांगेन हीनो न किंचित्क
रः॥३॥ तस्माद्ध्वनीयमेतत्पुण्यं रहस्यं परमं च तत्त्वं॥ यो ज्योतिषं वेत्ति नरः स सम्यग् धर्मार्थकामा
ल्लभते यशश्च॥४॥ एतां मयमायावरोरस्य धास्त्रभेवभिमतदैवतां मनेन स्फारेणत्रसात् भक्तिवि
शेषेण चाभिप्रेतार्थसिद्धिं याच्छति सदयमथ रमकुरुजनल्याम धामा सोमनामा गणकच
क्रचूडामणिराश्वलायनद्विजवर्यः पद्धतिभूषणनाम ग्रंथं चिकीर्षुर्निर्विघ्नसमाप्तिका

मः शिष्टाचारप्राप्तं प्रथमस्याभीष्टं गणपतिदेवतां नातिरूपं मंगलमालिन्याचरति॥ अलिकुल
वृतगंडभालशालींदुखंडं गलमिलदहितुंडं भूरिसिंदूरतुंडं॥ भजदधिगतपंडं सर्वदेवप्रचं
डं पृथुलललितपिंडं नौमि तं वक्रतुंडं॥१॥ अहं सोमनामा कविः अलिकुलेन भ्रमरसमूहे
न वृतं गंडं यस्य तं तथा भालशाली ललाटशोभितेंदुखंडं शकलं यस्य तं॥ तथा गले कंठे मि
लितं तुंडं ति अहिमुखानि सर्पतुंडानि यस्य तं॥ तथा भूरिप्रचुरं यस्यामेवं विधा शुंडा यस्य
तं॥ तथा भजद्भिर्निजभक्तैः अधिगता लब्धा पंडा शास्त्रोच्छा बुद्धिर्यस्मात्तं॥ सर्वथा सर्वदेवेषु प्र
चंडं मारुतं॥ तथा॥ पृथुलः स्थूलः ललितः सुंदरः पिंडो देहो यस्य तं॥ एवंविधं वक्रतुंडं ग
णपतिं नौमि वंदे॥१॥ कविस्वापत्यं पितृनाम कथनपूर्वकं चिकीर्षितं कुतवि[illegible]त्वेन प्रति
जानीते॥ ध॥ प्रथितबह्वृचकुरुद्रसुतः सुधी गणितविद्धृतसोमसमाह्वयः॥ परकृते कु
रुते चतुर[illegible]षणं सुगमपद्धतिपद्धतिभूषणं॥२॥ प्रथितो विख्यातो बह्वृच आश्वलायनो यो
रुद्रसमाह्विजस्तस्य सुतः तथा धृतसोमइति सम्यक् आह्वयो नामधेयं येन सः तथा गणितेव्य

कार्यक्रमरूपे वेत्ति जानातीति ॥ एवं सद्धीः सुमतिः परकृते परोपकारार्थी ॥ च्युत दूषणं निर्दूषणं तन
था सुगमा पद्धतिर्[illegible]णा भजनमार्गीयस्य तत् अतः एवं पद्धती नो जातकपद्धतीनां भूषणं कर्म
मिसन्वर्थकनामकं ग्रंथं कुरुते ॥ कुरुते इत्यात्मनेपदेन विविधविशिष्टश्रोतॄणाध्ययनजनिता
तिशयेन पुण्यफलभागित्वात्स्वार्थमपि ॥ २ ॥ अथात्र कर्तव्यं शास्त्रि न्याह ॥ ज्ञेय इति ॥ ज्ञेयः सुधीजन
न कालेऽत्र यंत्रैस्तत्रस्पष्टाः खेचराः खेटचाराः ॥ सर्वभावाः साधयः साधनीयास्तत्स्पष्टं नोदिष्टयः षड्बलानि ॥ २ ॥
स्पष्टार्थः ॥ अथ तन्वादिद्वादशभावानाम नुष्टुभाह ॥ चिलग्नं [illegible] व्यस्त हग्नाः [illegible] शुद्धियः ॥
मरणं धर्मकर्मायव्ययास्ते नामतः स्मृताः ॥ ३ ॥ विलग्नेति स्पष्टं ॥ अथ चतुर्थदशमभावसाधना
र्थं नतोन्नतसाधनं भुजंगप्रयातेनाह ॥ दिनार्धं स्फुटं जन्मकाले न हीनं नतं प्राक् च पश्चान्नतं व्यस्तयेन ॥
दिनार्द्धं क्षपाशेषयातान्वितं प्राक् परं स्यान्नतं तन्नतेनाग्निशुद्धं ॥ ४ ॥ दिवा पूर्वे दिवा पश्चिमे रात्रौ
पश्चिमे रात्रौ पूर्वमिति ॥ तत्र पूर्वे दिवा नतार्थं सूर्योदयादुपरि क[illegible] कल्पित इष्टकालः घ० ५।७
दिनार्द्धं १३।३ ० दिनार्द्धं जन्मकाले न हीनं जातं दिवा पूर्वनतं ८।२६ इदं त्रिंशच्च्युतं स्यात्तदिवापू
र्वोन्नतं २१।३४ अथ दिवा पश्चिमनतसाधनार्थं सूर्योदयादुपरि कल्पित इष्टकालः १५।२५ अयं दिनो
र्द्धहीनः सन् जातं दिवा पश्चिमनतं १।५५ इदं त्रिंशच्च्युतं जातं दिवा पश्चिमोन्नतं २८।५ अथ रा

॥१२॥

॥२॥

र्थं

त्रौ पश्चिमनतार्थं सूर्योदयात्तादुपरि कल्पित इष्टकालः ४०।१० अनेन युतं दिनार्द्धं जातं रात्रौ पश्चिमन
तं ५३।४० इदं त्रिंशच्च्युतं जातं रात्रौ पश्चिमोन्नतं ७।२० अथ रात्रौ पूर्वनतार्थं कल्पित इष्टकाल रात्रिशेष
५।१५ अनेन युतं दिनार्द्धं जातं रात्रौ पूर्वनतं १८।४५ इदं त्रिंशच्च्युतं जातं रात्रौ पूर्वोन्नतं ११।१५ मध्याह्नात्पू
र्वं जन्म चेत् तदा स्फुटं सिद्धान्तरहस्यादि साधितं दिनार्द्धं दिनमानदलं जन्मकाले न हीनं सत्प्रा
क् नतं पूर्वनतं स्यात् ॥ चेत्परं दिवा मध्याह्नादुपरि जन्म चेत्तदा व्यस्तयेन तु त्कवैपरीत्ये दिनार्द्धं
न हीनो जन्मकाल इत्यर्थः ॥ पश्चान्नतं पश्चिमनतं स्यात् ॥ दिनार्द्धं क्षपाशेषयातान्वितं सत् प्राक्
परं नतं स्यात् ॥ रात्रौ मध्यरात्रादुपरि जन्म चेत्तदा रात्रिशेषघटिपलैर्युतं दिनार्द्धं पूर्वनतं स्यात्प्रा
त्रौ मध्यरात्रात्पूर्वं जन्म चेत्तदा रात्रिगतघटिपलैः युतं दिनार्द्धं पश्चिमनतं स्यादित्यर्थः ॥ मध्याह्ने
मध्यरात्रे नताभावदर्शनं सिद्धं ॥ तत्पुनः तन्नतेनाग्निशुद्धं सत् उन्नतं स्यात् ॥ पूर्वोन्नतं त्रिंशच्च्यु
तं पूर्वोन्नतं स्यात् ॥ एवं परः अथ ग्रंथकर्ता सोमदैवज्ञजन्मसमयमधीसोदाहरणं क्रमो
लिख्यते ॥ तत्र निखिलमहिमंडलमंडलस्य परमपराक्रमस्य श्रीविक्रमस्य शाकात् गताब्दाः
१६८५ सकलसंपदाधिष्ठानप्रतिष्ठानपुरग्रामावतारस्याधिकशालिवाहनस्य श्रीशालि
शाका सहनेगताब्दाः १५१२ प्लवंगनामसंवत्सरे मार्गशीर्ष कृष्ण १२ रवौ घटि २०।३६ नतेः सप्तमी

मघानक्षत्रघ०५८।५१विशुंभघ०५८।४५एवंविधेशुभदिनेसूर्योदियादुपरिगतघटिप०३प०सूर्यो
स्तादुपरिघा२५प३०तुललग्नेमिनांशेश्रीमद्भास्करीयनामास्मात्सकुरुसोमदेवग्रंथकर्तु
सकलकलापनामपंडिताधिष्टितजलग्रामेजन्मजातं॥अथात्रमध्यमनेतसाधनार्थंसिद्धांतर
हस्याहर्गणो८०चक्रं०अधिमासाः४मासगणः१३२अवमानि६२अहर्गणः३८९१अयनांशाः
१८।१५अथजलग्रामेअक्षभा४।३०चरखंडानि४५।३६।१५दिनार्द्धं१३।३०दिनमानं२७।०रात्र्य
र्द्धं१६।३०रात्रिमानं३३।०अथोन्नतोन्नतोदाहरणं॥नतंचतुर्विधमस्ति॥अथरात्रौपूर्वनतार्थं
सूर्योदयास्तादुपरिश्रीमत्कुरुसोमदेवस्यजन्मसमयः घ२५।०अयंरात्रिमानादस्मात्३३पतितो
जातोरात्रिशेषकालः८।०अनेनयुतंदिनार्द्धंजातंरात्रौपूर्वनतं२१।३०इदंत्रिंशच्च्युतंरात्रौपूर्वो
न्नतं८।३०अथलग्नसाधनेशार्दूलविक्रीडितेद्वेआर्ये॥तत्कालोत्थरवेःसायनांशसहित
स्याभोग्यभागाहतास्त्रिराङ्कस्वकीयउदयःस्याद्भोग्यकालस्फुटः॥भक्तांशरितिभुक्त
कालमुदितस्तंभोग्यकालंरवेस्तत्काभीष्टपलप्रजोदथनिजानन्याद्यानशोधयेत्॥१॥
शेषंपरवरामजमशुद्धभक्तंभागादिकंत्यशुद्धपूर्वैः॥मेषादिभिरंत्रिभिरूर्ध्वमाद्यंल
नंस्फुटंस्यादयनांशहीनं॥२॥अथउदाहरणं॥जन्मकालीनरविः७।२९।३।१५अयमपिर
यनांशैः१८।१५सहितः८।१७।४८।४८अयंसषड्भाकोप्यत्रौलग्नसाध्यमितिवक्ष्यमाणोक्ते
षड्भाशिदयुतः२।१७।४८।४८अस्यभुक्तभा१७।४८।४८त्रिंशच्च्युताजातोभोग्यभागाः१२।११।१२एभि
सायनषड्भसूर्याक्रांतमिथुनराशेस्वकीयउदयोयं३०८हतोजातः३७७३अयंत्रिंशद्भक्तःसन्
जातोरवेःभोग्यकालःपलात्मकः१२५एवंभुक्तांशोमुलितःस्वकीयउदयस्त्रिंशेभक्तोभुक्त
कालमुदितः॥रविभोग्यकालेस्मिन्१२५जन्मकालीनरात्रिगतघटि२५।० मासापलअनन्त
रस्मात्१५००शोधितेसतिशेषं१३७५अस्मान्मिथुनाग्निमकर्कराशेरुदयेस्मिन्३४०शोधिते
शेषं१०३५अस्मात्कर्कोग्निमसिंहराशेरुदयेस्मिन्३४५शोधितेसतिशेषं७०२अस्मात्सिंहा
ग्निमकन्याराशेरुदयोस्मिन्३२३शोधितेसतिशेषं३७९अस्मात्कन्याग्निमतुलराशेरुदयो
स्मिन्३२३शोधितेसतिशेषं५६शेषरामघ्नं१६८०इदंअशुद्धोदयेनवृश्चिकोदयेनानेन३४५
भक्तेसतिलब्धंभागादिकं५।०।५३इदंमेषादिशुद्धवृश्चिकराशेःपूर्वैःसप्तराशेःपूर्वैसप्त
राशिभिःऊर्ध्वमाद्यं७।५।०।५३इदमयनांशहीनंसत्जातंस्फुटंलग्नं६।१६।४५।५३अथ
शालिन्याह॥भोग्यादल्पेष्टकालेसतिलग्नसाधनंरात्रौजन्मकालेसतिलग्नसाधनंजायाभावसाधनं
लग्नमर्कात्सषड्भाद्रात्रौसाध्यंषड्भयुक्तंसप्तमंस्यात्॥७॥स्पष्ट॥अस्योदाहरणार्थंसूर्योद
यादुपरिकल्पितइष्टकालपलात्मकः३०इष्टकालिनसूर्यः७।२०।५०।२८सायनः८।९।६।५।२८

भौ

अस्य भोग्य भागैरेभिः १३।४।४ सायन स्सूर्याक्रांत धनुराशेरुदयोयं २७ हृतः स्थिरांशाद्र्कः सन्न
जातोरविभोग्य कालपलात्मकः ११८ असौ कल्पितेष्ट कालादस्मात् ३० न शुध्यति अतः भोग्य
दस्माभीष्ट कालोयं ३० खरामैर्निघ्नः ९०० असौ सूर्याक्रांत धनुरुदयेनानेन ११५ भक्तः सन्नुल
ब्ध भागैरेभिः २।७।४५ निरयन सूर्योयं ८।२८।५०।२८ युक्तो जातं लग्नं ९।११।३०।१२ अथ रा
त्रौ जन्मकाले सति षड्राशियुक्तादर्कात्प्राग्वत्कालोर्थ इ लग्न नाशसहितः इस ने न लग्नं सा
धनीयं अथ ननु लग्नं साधितं जन्मलग्नं षड्राशियुक्तं जातो जायाभावः ०।१६।५५।५७ एवं
तनु भाव जायाभावौ साधयित्वा तदुपदं वक्ष्यमाण चतुर्थदशम भाव साधनोपयुक्तानि लंको
दयपलानि रथोद्धतयाह॥ नागभानि २७८ नव नंद २९९ बाहवो रामलोचन गुणाः ३२३ क्र
मोत्क्रमात् व्यक्षजोदय पलानि मेषतो व्युत्क्रमेण घटतो गुराशिषु॥८॥ क्रमोत्क्रमास्मिना
दस्याध्याहारः नागभानि २७८ नवनंद बाहवः २९९ रामलोचन गुणाः ३२३ एतेकाः एष
तः अंगराशिषु षट् राशिष्वेत्यर्थः व्यक्षजोदयपलानि विगतान्यक्षांशोशायस्मादि
निव्यक्षः लंकाप्रदेश इत्यर्थः॥ तज्जान्युदयपलानि स्युः अथ तान्युदयपलानि व्यु
त्क्रमेण विपरीतगणनया घटस्तुलातो राशिषु स्युः॥ अथ जन्मनि पूर्वेन तस्स्यै
कैण लग्नकर्मणा दशम चतुर्थभाव साधनं शार्दूलविक्रीडितेनाह॥ प्राक् स्वपलब्ध

जाद्यविगतं लंकोदयेभ्यः स्वजे व्यस्तानां स्युदयो भवेन्निगुणिताशेषाद शुद्धोद्धृतो भागाद्यो म शु
द्धभांक पतितं हीनायनांशं हि यद्रक्तं स्याद्दणसंज्ञः सदशमो भावः सुहृत् षड्युक्॥९॥ हि ग
णकः प्राक्स्वस्य पूर्वेन स्वस्य पलं जातं लंकोदयो थं विगतं विभुक्तकालः स्वजेते॥ शोधयेत्
अथ यस्य राशेः पुक्तकालः शुद्धस्ततो व्यस्तान् एष्टगानित्यर्थः राशि लंकोदयान् स्वजेत्॥ एवं कृते
सति यस्माच्छेषात् स्युदयो न शुध्यति तस्मात् त्रिगुणितात् शुद्धराशिलंकोदयेन
[illegible] भक्तात् शेषात् यद्भागादि लब्धं तदशुद्धभांक पतितम् शुद्धराशिक संख्यायाः शोधि
तं सत् हीनायनांशं कार्यम्॥ एवं कृते निश्चयेन यद्दशसंज्ञकं लग्नं स्यात् स दशमो भावः
षड्युक्तः सन् सुहृत् चतुर्थो भावोतेयः॥ अथ दशमभावानयने रात्रौ जन्मकाले सति सू
र्यषड्राशियुक्तोन कार्यः उदाहरणं॥ जन्मकालीन पूर्वनतं २१।३० जन्मकालीनः सूर्यः ८।२२।३९
५९ सायनः ८।१०।१८।५२ अस्य भुक्तभागैरेभिः १०।१८।५८ सायन सूर्याक्रांत धनराशेर्लंकोद
योयं ३२३ गुणितो जातः ५७।३३ अयं त्रिंशद्भक्तोसन् जातो रवेः भुक्तकालः पलात्मकः ११९ अस्मिन्
विभुक्तकाले सति जन्मकालीन पूर्वनतस्य २१।३० पलं जातं अस्मात् १२९० शोधिते सति शेषं १०११
अस्माद् तु पृष्टगत्या कृत्वा राशिलंकोदयैः स्मिन् शोधिते सति शेषं ८०० अस्मात् राश्विक फल ध्व तुला

नानेना २९९

राशेर्लंकोदयस्मिन् २७८ शोधिते सति शेषं ५२२ अस्मात् तुलाष्टघ्न कन्याराशेर्लंकोदयेस्मिन् २७८ शोधिते स
ति शेषं २४४ अस्मात् कन्याष्टघ्नात् सिंहराशेर्लंकोदयोयं २९९ न शुध्यति अतः शेषं २४४ खाग्निगुणितं ७३२
न्यात् त्रिभ्यः पंचभ्यः शोध्यः ४।५।३० अशुद्ध सिंहराशि लंकोदयेनानेन २९९ भक्त सत् लब्धं भागादि फलं २।१२ ... अशुद्ध सिंहराश्यंकेन्तु
... लग्नानयने पूर्वनतेर विभक्त फलात्पूर्वके सति दशमभाव साधनं भुजंगप्रयातेनाह ॥ पश्चाभु
क्त कालात्पूर्वके पूर्वनतं तदा खाग्नि निघ्नं स्वलंकोदयाप्तं ॥ लब्धांशफलं यद्भवेत्तेन हीनः स्वराशि भुःस्व
मध्यस्थलग्नं निरुक्तं ॥१०॥ अस्योदाहरणार्थं सूर्योदयादुपरि कल्पितेष्टकाले १।३० दिनार्धं १७।३
उक्तवत्पूर्वनतं ०।३० इष्टकालीनः सूर्यः ७।२९।३।१२ सायनः ८।१७।१८।१२ अस्य भुक्तभागोस्मिं ११।
१।१२ सायन सूर्याक्रांत धनुराशेर्लंकोदयोयं ३२३ गुणितो जातः ५५।३५ अयं त्रिंशद्भक्त सन् ॥ जातो भु
क्तकालः पलात्मकः १८४ असौ पूर्वनतात् दस्मात् ३० न शुध्यति अतो भुक्तकालात्पूर्वनतं ३० खाग्निगु
णितं ९०० इदं स्वस्य सायन सूर्याक्रांत धनुराशेर्लंकोदयेनानेन ३२३ भक्त सत् लब्धं लवाद्यं २।४७।१४
अनेन निरयन सूर्योयं ७।२९।३।१२ हीनो जातो दशमभावः ७।२६।१६।१२ अथ जन्मनि पूर्वनते सति
पूर्वनतात् प्रकारांतरेण दशमभाव साधन ... मनु ... पूर्वोभनतात् षड्भा ... कालं कोद
य ... ॥ ... सदशमो ... ॥१०॥ अस्योदाहरणं जन्मकालिने पूर्वनते
नं ०।३० जन्मकालिन सूर्यः ७।२९।३।५४ सायन ८।१७।१७।५४ षड्भारीयुक्तः २।१७।१७।५४ अस्य भो
ग्यभागैः एभिः १२।१२।६ सायनस्य ... क्रांत मिथुनराशेर्लंकोदयोयं ३२३ गुणितो जातः ३८।१६ अयं त्रिंशद्भक्तः
सन् जातो रविभोग्यकालो पलात्मकः १२७ अस्मिन् भोग्यकाले पूर्वोन्नतस्यास्य ८।३० पल अजादस्मात् ५९० शोधिते
सति शेषं ३७० अस्मान्मिथुनान्मिमकर्कराशेर्लंकोदयस्मिन् ३२३ शोधिते सति शेषं ५ अस्मात् कर्कान्सिंहमसि
हराशेर्लंकोदयोयं २९९ न शुध्यति अतः शेषमिदं ४५ खरामघ्नं १३५० अशुद्ध सिंहराशि लंकोदयेनानेन २९९
भक्तं सत् लब्धं भागादिकं ४।३२।... अशुद्ध सिंहराशेः पूर्वेण तु भिर्मेषादि भिराशिभिरूर्ध्वमाद्यं ४।४५
... अयनांशहीनं सत् जातो दशमभावः ३।१९।१३।३ अथ जन्मनि पश्चिमनते सति दशमभाव साधनं
शार्दूलविक्रीडितेनाह ॥ परनतं लंकोदयतपनेर्युक्तमभवल्लग्नं सदशमभावः ॥११॥ उदाहरणं ॥ दिवा पश्चिमन
तार्थं सूर्योदयादुपरि प्राक्कल्पितेष्टकालः ३२।२५ पश्चिमनतं १।५५ इष्टकालीनः सूर्यः ७।२९।५।४० साय
नः ८।१७।१७।४० अस्य भोग्यभागैरेभिः १२।४२।२० सायन सूर्याक्रांत धनुषे लंकोदयोयं ३२३ गुणितो जातः
... अयं त्रिंशद्भक्तः सन् जातो रवेर्भोग्यकालः पलात्मकालः १३८ असौ पश्चिमनतस्यास्य १।१५
पल अजादस्मात् ७५ न शुध्यति अतो भोग्यादस्मादभीष्टकालोयं ११५ खरामघ्नः निघ्नः ३४५० अ
सौ सायन सूर्याक्रांत धनुराशेर्लंकोदयेनानेन ३२३ भक्तः सन् लब्धभागोरेभिः १०।४।५२ निर
यन सूर्योयं ७।२९।५।४० युक्तो जातो लग्नं ८।१०।१०।३२ अयमेव दशमो भावः अथ जन्मनि नताभावे
सति चतुर्थदशमभावो स्यागतयाह ॥ रात्रिमानार्द्धदिनमानदलेन ... ज्ञायते नहि नतं यदि तर्हि ॥
रात्रिमानार्द्धदिनमानदलोत्थो भानुमानि हसुहृद्दशमः स्यात् ॥१२॥ जन्मरात्रिमान दिनमानदले जन्मानि

६

जाले सति सध्याहारः ॥ यदि तत्र न तन्न हि जाते तर्हि किं क्रमेण रात्रिमानं दिनमानं दलोत्थो भानुमानि सुहृद्धाम स्य
स्यात् ॥ मध्याह्ने जन्म चेत् तदा मध्याह्नतो रविर्दशम भावः स्यादित्यर्थः ॥ १३ ॥ अथ धनभावस्य सहजभावस्य धनं तं
स्य संधिसाधनं च मालिन्याह ॥ तनुभावो विरयुक्तचतुर्थभावात् रसभागेन युतास्तनुर्हि संधिः ॥ सयुतो धनभा
व एवमेव विहितसंधियुतास्तृतीयभावः ॥ १४ ॥ उदाहरणं ॥ तनुभावः ६।१६।५५।५६ अनेन चतुर्थभावात्
३।१७।२६।१७ हीनो जातः ३।०।३०।३१ अस्मात् कृतीतारोद्यादि कोरसभागः ०।१६।५।१२ अनेन तनुभावोस्मिन् १६
६।१।५५।५६ युक्ते सति जातस्तनुभावाग्रिमः संधिः ७।२।०।५५ असौ रसभागयुक्तो जातो धनभावः ७।१७।५।५७
अस्मिन् रसभागयुक्ते सति जातः धनभावाग्रिमः संधिः ८।२।१०।५९ असौ रसभागयुक्तो जातः सहजभा
वः ८।१७।१६।११ अस्मिन् रसभागयुक्ते सति जातः सहजभावाग्रिमः संधिः ९।२।२१।१३ अथ सुतभावरिपुभाव
साधनं तत्संधिसाधनं चानुष्टुभाह ५ एकराशिविशुद्धेन षष्ठांशेन युतः सुहृत् ॥ संधिः स्यात्सयुतः पुत्रः अ
क्तसंधियुग्रिपुः ॥ १५ ॥ उदाहरणं ॥ सप्तमषष्ठांशः ०।१०।५।१२ अयमेकराशिमध्ये पतितः ०।१९।५४।५८ अने
न सुहृद्भावस्मिन् ९।१७।२१।१७ युक्ते सति जातः सुहृद्भावाग्रिमः संधिः १०।२।२७।१५ अयमेकराशिच्युतः
षष्ठांशेन युक्तो जातः सुतभावः १०।१७।१६।१३ अस्मिन्नेकराशिच्युतः षष्ठांशेन युक्ते सति जातः सुत
भावाग्रिमः संधिः ११।२।१।१७ अयमेकराशिच्युतः षष्ठांशेन युक्तो जातो रिपुभावः ११।१७।५।१५ अ
स्मिन्नेकराशिच्युतः षष्ठांशेन युक्तो जातो रिपुभावाग्रिमः संधिः ०।२।१५७ एवं प्रथमभावषट्के तत्संधयो च सिद्धे सति

६

तदग्रिमभावसंधिसाधनं संधिसंज्ञां च शालिन्याह ॥ एवं भावाः षट् तथा संधयः स्युः षड्भिर्युक्तास्ते च जायादयो ये ॥
आरंभाख्याथो विरामाख्य एतौ द्वौ द्वौ स्यातामेकभावस्य संधिः ॥ १६ ॥ एवमुक्तप्रकारेण ये षड् भावास्तनुभावादय
स्तथा षट् संधयः सिद्धा स अध्याहारः ॥ ते षड्भिर्युक्ताः सन्तो ये च जायादयः सप्त संधयो ये भावाः स्युः ॥ तनुभावः ष
ड्राशियुक्तो जायाभावः स्यात् ॥ तनुभावाग्रिम संधिः षड्राशियुक्तो जायाभावाग्रिमः संधिः स्यात् ॥ एवं धन
भावादयः स संधयः षड्राशियुक्ताः सन्तो ग्रिमाः मृत्युभावादयः स संधयो भावा भवन्तीत्यर्थः ॥ अथै
कभावस्यारंभाख्यो विरामाख्यश्चेतौ द्वौ द्वौ संधिस्यातां ॥ एतदुक्तं भवति ॥ इह किल भावद्वयान्तर्गत
एकसंधिः संज्ञाद्वयं देहलीदीपकन्यायेन लभ्यते ॥ तत्र पूर्वभावविरामाख्यः अरभावारंभाख्यः ॥ एवं सति
यस्तनुभावाग्रिमः संधिः स तनुभावविरामसंधिर्धनभावारंभसंधिश्च भवति ॥ यो हि धनभावाग्रि
मः संधिः स धनभावविरामसंधिः सहजभावारंभसंधिश्च भवति ॥ इत्येकधनभावस्यारंभविरा
मसंधौ द्वौ द्वौ संधी भवतः एवमेव सर्वभावानां प्रत्येकं संधिद्वयं ज्ञेयं ॥ अस्योदाहरणं व्याख्याया रूपन
मेव ॥ अथ ग्रहस्य भावबलीभावपरमभावबलं च लघुस्रग्विण्याह ॥ संधितुल्ये ग्रहे शून्यतुल्यं बलं ॥
भावतुल्ये ग्रहे रूपतुल्यं बलं ॥ १७ ॥ अत्र पूर्वार्धोयं परमबलं रूपं मितं कल्पितमस्ति ॥ रूपं तु ष
ष्टिः ६० कलात्मकं ॥ अथ ग्रहे संधिसमे सति शून्यमितं बलं स्यात् ॥ उच्चमित्रसमराशुभवनादिजं फलं तु
स्यादेवं भावसमे ग्रहे सति रूपमितं भावबलं भवेत् ॥ अथ ग्रहाधिष्ठितभावात् चलनेरथो द्वयाह ॥ खेचर

अथ सर्वेषां ग्रहाणां स्वाधिष्ठितभावानामारंभसंधिभ्योधिक

प्रथम[illegible]संधिना स्थकः पूर्वभावजफलं दिशसलं॥ सोधिकाद्यादि विरामसंधितस्तर्हि यदनितद्यभावजं

॥ यदि खेचरो यस्मिन् भावे तिष्ठति तस्य प्रथमसंधितः आरंभसंधेरल्पकः स्यूनश्चेत्तदा अग्रलं निश्चयेन पूर्वभाव

जफलं दिशतीति दृढं॥ सः यदि विरामसंधितः अधिकश्चेत्तर्हि तदग्रिमभावो यो भावस्तज्जफलं प्रयच्छतीति दृढं॥

सः यदि[illegible]तदग्रिमभावो[illegible]॥ आरंभसंधेरधिको विरा

मसंधेन्यूनो ग्रहः स्वाधिष्ठितभावफलं ददातीति अर्थात् सिद्धं॥ विराम संधेश्चान्यूनाश्च सतिअतोयथास्थि

तम्॥ अथात्र वक्ष्यमाणजन्मभावेषु जन्मकालिनो बुधरविक्रमेण स्वाधिष्ठितभावोभ्यां पूर्वपरभावफला

दो वर्तेतिनत्त्वहरणं प्रदर्श्यते॥ जन्मकालिनो बुधः ८।१९।३५।१९ बुधाधिष्ठितभावः ८।२८।१५।२२ अस्यारंभसं

धिः ८।१६।१०।१० अस्माद्बुधो न्यूनोस्तिअतस्तनुभावात्पूर्वस्य व्ययभावस्य फलं दत्ता जन्मकालिनो रविः ७

२१।३।१९ एतदधिष्ठितभावः ७।७।१५।१८ अस्य विरामसंधिः ७।२०।३१।५२ अस्माद्रविरधिकोस्ति अतः आय

भावापि मध्ययं[illegible]भावस्यफलं ददौ। अथ भावाधिके खेटे सति भावबलसाधनमिदं

वक्ष्यामहे॥ भावेन खेटप्रथमेन संधिनाहीनो यथा भावाभ्यधिकोन भवेत्॥ योध्यो सुसंधेस्तुधियाप

देन्तरं तद्वच्चसंध्यन्तरहृल्लभवेत्॥ २१॥ सुधिया भावो न खेटः प्रथमेन संधिना आभरेसंधिना हीनः

कार्यः अथ भावाभ्यधिको न भवेत् अस्यसंधेस्तद्विरामसंधेः शोध्यः एवं सति यदन्तरं तमुस घतेन त

भावसंध्यन्तरहृत्सत्रूपादिबलं भवेत्॥ आरंभसंधिहीनेग्रहे सति यदन्तरं तदारंभसंधिभावान्तरेभ

क्तं सत्तबलं स्यात्। विरामसंधिपातिते ग्रहे सति यदन्तरं तद्विरामसंधिभावान्तरेभक्तं सत्तभावबलं स्याद्

उदाहरणं॥ रविः ७।२१।३।१९ रव्याधिष्ठितधनभावः ७।१७।१५।१५ अस्मात् रविरधिकोस्ति अतः रवौ तद्वि

रामसंधेः अस्मात् ८।२।११।१५ शोधितसत्तिजातं तत् तस्याधनं ०।१।२।१।० पिकला कृते ५४।३० अनेन न विक

लामयन विकलामयमिदं ९ भक्ते सत्तजातं रवेर्भावबलं रूपादिकं ०।१।१०। एवं चन्द्रादीनां भावबलानि

साध्यानि॥ अथ भावबलानामारोहसंज्ञामवरोहसंज्ञामनुष्टुभाह॥ आरंभसंधितो जातमारोहं

बलमुच्यते॥ विरामसंधितो जातमवरोहाभिदं तथा॥ २०॥ अथ भावसंधिनां न केवलं जन्मनि प्रयोज

नं किंतु नृपाभिषेकादिष्वपीति मालिन्या हा॥ इति जन्मनि नृपाभिषेकचौलव्रतबंधादिषु संधियु

क्तभावान्॥ गणकोगणितार्णवपत्तो गोचिद्धातु प्रबलं फलं यतस्ते॥ २१॥ गणितार्णवाचनीर्णो

गणितपारावारपारंगता गणकः इतिपूर्वोक्तप्रकारेण जन्मनृपाभिषेकचौलव्रतबंधादिषु कर्मसु आ

दिशद्देन सकलमंगलकर्माणि गृह्यंते संधियुक्तभावान् अतःकारणाद्विदधातु कुरोतु॥ यतस्ते भावसंधिभिस्त

त्कर्मसु प्रबलमस्ति॥ २१॥ इति सोमदैवज्ञविरचिते पद्धतिभूषणटीकायां उदाहरणमुक्तायमुद्धि चिलासविनिस

समाख्यो भावसाधनाध्यायः प्रथमः॥ १॥ अथ दृष्टिविधिवृत्तमाय भावप्रयोजनं रथोद्धतयाह॥ दृक्फलनि

नि विविधानि होरिके जातकेष्विनिगादितानि यत्नतः॥ स्पष्टखेटभवदृष्टिसाधनं तद्धि निर्णयकृताभिधी

यते॥ १॥ होरिके जातकशास्त्रे तद्दृष्टिजानंतीति होरिकाः तेः होरिके वराहमिहरादिभिः जातके स्वकृते जा

तकसंग्रहे यानि विविधानि नानाप्रकाराणि शुभाशुभानि दृक्फलानि यत्नतः निगदितानि संतिनेषां द

६ दृष्ट॰ राशिपंचकं क्षिप्यते॥ फलहतलवाः कराभ्यां द्वाभ्यां आहता ये गुणिता ये लवाः॥ अत्रापि लवशब्देन कला गृह्यते॥

चिनिर्णयकृते संपूर्णदृष्टौ स स्रो शुभाशुभं वा न सफलं संपूर्णस्यादर्द्धदृष्टौ स स्रो अर्द्धं स्यादित्यादि निश्चया यस्य दृष्टेरे

दृभावदृष्टिसाधनं मयाभिधीयते प्रोच्यते॥१॥ अथ दृष्टिसाधनं शार्दूलविक्रीडितेनाह॥ द्रष्टव्यदृष्टखगोनिते भन

वकोदकादिका दृष्टयो भागाद्यं द्विहृतं शरेंदुसहितं यंशाद्यं पंचाध्ययः॥ त्रिंशच्छुद्धलवाः फलाहतलवाः षष्ठ्यादि

द्वितो भार्गवो नाराचा भयोनचोहृतं भुजो स्वाज्वालयाधोनिता॥२॥ यः पश्यति स द्रष्टा॥ द्रष्टुं योग्यो यः स द्रष्टव्यः

अथ द्रष्टव्यग्रहे भावे वा द्रष्टखगोनिते सति शेषादेकाद्यं नात् दृष्टयः स्युः॥ कथं स्युस्तदाह॥ द्रष्टूने द्रष्टव्ये स

ति यद्यूर्ध्वमेकराशिः शिष्यते तर्हि भागाद्यं द्विहृतं द्वाभ्यां भक्तं सत् कलादिदृष्टिः स्यात्॥ राशिद्वयं चेच्छिष्यते

तर्हि भागाद्यं भागस्थाने शरेंदुसहितं पंचदशयुक्तं सत् कलादिदृष्टिः स्यात्॥ राशित्रयं चेच्छिष्यते तर्हि यंशा

र्धं पंचाध्ययः विगतं मंशार्द्धं भागाद्यं येभ्यः लवं विधाय पंचपंचाध्ययः पंचचत्वारिंशत्॥ तत्रामितो कला

दिदृष्टिः स्यात्॥ राशिचतुष्टयं चेच्छिष्यते तर्हि त्रिंशच्छुद्धलवाः त्रिंशच्छुद्धा ये लवाः अंशलवशब्देन कला गृ

ह्यते तत्रामिता कलादिदृष्टिः स्यात्॥ अथ भार्गवः षष्ट्या नाराचा वा बुधः पंचचत्वारिंशत्॥ नभोहृतयः त्रि

शत्॥ अत्राओः पंचदशः एते फाः लवा घड्नभागाघड्नउनिताः संतः क्रमेण षष्ठ्यादितः षष्ठसप्तमा

ष्टनवमराशितः कलादिदृष्टयः स्युः॥ अर्थात् दशमेकाद[illegible]पूर्णमित शेषराशिषु दृष्ट्याभावः॥२॥

उदाहरणं॥ द्रष्टा रविः ७।२९।३९।५८ द्रष्टव्यश्चंद्रः ७।२२।२०।१९ द्रष्टा रविना द्रष्टव्ये चंद्रे हीने सति जातं राश्या

द्यंतरं ०।२२।३०।१९ अत्र राशिस्थाने शून्यं संति अतो भागाद्यस्यास्य १२।३०।१९ अर्द्धं ६।१५।८ अनेन नभोहृ

तभुजत्व ६।३० एतेन फाः उनिताः २३।४५।५२ इयं कलादिदृष्टिः रूपस्थाने शून्यपुतासति रूपादिस्यात्॥ अ

३

भ५०॥

नक्षत्रमितोफलादिदृष्टिःस्या॥

६

दश

अत्र सर्वत्र विकल्पाध्यस्थेव यव द्विरंशद्यधिकश्चेत्तर्हि विकलास्वेकोयोज्यः॥ त्रिंशन्न्यूनश्चेत्तर्हि स त्याज्यः एवं कृते सति

सूर्यस्य चंद्रं प्रति जातारूपादिदृष्टिः ०।२३।४५ एवमन्ययोर्ग्रहयोर्भावदृष्टयश्च साध्याः॥ अथ भौमस्य विशेषदृष्टिसाध

नं भुजंगप्रयातेनाह॥ कुजोने निरीक्ष्ये यदा भस्थले द्वौ रसास्युस्तदंशाद्विभक्ता भवेद् कु॥ त्र्यः सप्त चेत्तर्हि तद्भोग्य

भागाद्विभक्ता भवेद्भौमस्य दृष्टिर्विशेषा॥३॥ उदाहरणं॥ द्रष्टा भौमः ६।१७।१९।५१ निरीक्ष्यो बुधः ८।१७।५२।१९ नि

रीक्ष्ये बुधे कुजोने सति जातं राश्याद्यंतरं २।०।३३।२८ अत्र राशिस्थले द्वौ वर्त्तते अतो स्य भुक्ताः भागाः ०।४०।३९

एते द्विभक्ताः १।५०।१९ इयं कलादि विशेषदृष्टिः रूपस्थाने शून्ययुक्ता सति भौमस्य बुधं प्रति जातारूपादि विशे

षदृष्टिः ०।१।५०।१९ एवं यथासंभवं ग्रहेषु परिभावेषु परिवा भौमविशेषदृष्टयः साध्याः॥३॥ अथ बृहस्पतिविशेष

दृष्टिसाधनं भुजंगप्रयातेनाह॥ गुरूने निरीक्ष्ये त्रराशिस्थले स्युस्त्रयः सप्त चेत्तर्हि द्विभागतुल्या॥ यदा ष्टाङ्ग

लाः स्युस्तदा भोग्यभागाद्भिता स्यात्स्फुरेज्यस्य दृष्टिर्विशेषात्॥४॥ उदाहरणं॥ द्रष्टा बृहस्पतिः ११।१२।१९।४४

निरीक्ष्यः सूर्यः ७।२९।३९।५८ निरीक्ष्ये सूर्ये गुरूने सति जातं राश्याद्यंतरं ८।१७।२०।१४ अत्र राशिस्थले ८ सति॥

अतोऽस्य भुक्ता भागाः १७।२०।१४ एते त्रिभिर्हृता जाता भोग्यभागाः १२।३९।४५ इयं कलादिविशेषदृष्टिः॥

रूपस्थाने शून्ययुक्ता सति गुरोः सूर्यं प्रति जातारूपादिविशेषदृष्टिः ०।१२।३९।४५ एवं यथासंभवं ग्रहपरिभा

वेषु परिवा गुरुविशेषदृष्टयः साध्याः॥५॥ अथ शनेश्वरविशेषदृष्टिसाधनं भुजंगप्रयातेनाह॥ विमंदे नि

रीक्ष्ये यदा भस्थले ऽष्टौ गजाः स्युस्तदा त्रिघ्नभागा दृष्टिः॥ नवद्वौ यदा स्युस्तदा भोग्यभागास्त्रिनिघ्ना द्विभक्ताः शनेर्दृग्विशेषा॥६॥

॥१२॥

द्वशशनि[illegible]श्वरः ८।२८।५८।३।शनिरिक्ष्योगुरुः ११।१२।४१।१५।निरिक्ष्योगुरौशनिश्चरोनेसतिजातंतराश्या
धांतरं ३।११।२३।१४।अंतराशिस्थलेनैवत्तैनेअंतोस्यभुक्तभागौ १२।२७।१८एनेत्रिराघुष्टाःजाताभोग्यभागाः
१६।३२।८।१८ त्रिघ्नः ४९।३८।२४।५४ द्विभक्तोः २४।४९।१२।२७ स्पष्टफलादिविशेषदृष्टिः स्पष्टस्थानेशुक्रस्ययुक्तासतिशनै
गुरुंप्रतिजातोरूपादिविशेषदृष्टिः॥०।२४।४९।१२।एवंयथासंभवंग्रहोपरिभावोपरि वाशनिविशेषदृष्ट
यः साध्याः अथभौमगुरुशनैश्चराणांपूर्वदृष्टीनांविशेषदृष्टीनां चयोगस्फुटनामनुष्टुभाह॥इतिभौमे
ज्यमंदानांविशेषादृष्टिरीरिता॥अनयासहितापूर्वादृष्टिस्तेषांस्फुटाभवेत्॥६॥उदाहरणं॥भौमस्य
बुधंप्रतिपूर्वदृष्टिः ०।२८।३७ विशेषदृष्टिः ०।३।५० अनयायुक्तासतिजातोभौमस्यबुधंप्रतिस्पष्टादृ
ष्टिः ०।३०।२९ एवंगुरुशनैश्चरयोःस्पष्टादृष्टयोज्ञेयाः॥इतिपद्धतिभूषणटीकायांदृष्टिसाधनाध्यायः २

॥१२॥

विशेषदृष्टिसहितामहदृष्टयः॥

र	म	बु	भु	बु	गु	शु	श
र	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
च	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
म	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
बु	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
गु	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
शु	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
श	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

रव्यादीनांविशेषदृष्टिसहिताभावदृष्टयः॥

	त	ध	स	सु	सु	र	जा	मृ	ध	क	आ	व्य
र	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
च	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
म	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
बु	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
गु	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
शु	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
श	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

भारोहावरोहसंज्ञभावः

[illegible]	[illegible]	[illegible]	मे
[illegible]	[illegible]	[illegible]	वृ
[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]

अथषड्बलानिविवक्षुस्तावदुच्चयोजनंशालिन्याह॥यस्मात्सम्यक्षड्बलानांप्रबोधोदायुर्दायःसाध्यतेदैवविद्भिः॥षड्भे
देःस्थानवीर्यप्रमुख्यैःसूर्यादीनांतानितस्माद्ब्रवीमि॥१॥स्पष्टं॥अथग्रहाणामुच्चबलार्थमुच्चनीचास्युपजातिकयाह॥आ
धेत्रोक्तस्थानवीर्यद्वितीयंदिग्वीर्योस्वंकालवीर्यंतृतीयं॥तुर्यंनैसर्गिकंपंचमंचचेष्टावीर्यंदृग्बलंषष्ठमेव॥२॥स्पष्टं॥सू
र्यादिकरूच्चाःक्रियगोमृगस्त्रीकर्कोंत्स्यजूकाद्दशाग्निकुलात्रैः॥गजाश्विभिर्बाणकुभिःशरेषुनैर्नखेर्लवैरस्तगतासुनी
चाः॥३॥क्रियोमेषराशिःगौर्वृषराशिःमृगोमकरराशिःस्त्रीकन्याराशिःत्सोमीनराशिःजूकस्तुलाराशिः॥अन्य
त्सर्वंस्पष्टं॥अथाचल— साधनंभुजंगप्रयातेनाह॥अथानीचखेटांतरंषड्भतोस्मेभवेद्वृद्धिमाडिर्विधेयंतथैव॥४॥
दलंदृश्यघ्नंलवाद्यंनखघ्नंकलाद्यंबलंतुंगजंस्यादुहाद्यं॥ठ॥नीचखेटांतरंषड्भतःषड्भाधिकंस्यंभवेत्तथैववृद्धि
मद्भिर्विधेयं॥एवंकृतेसतिलब्धंलवाद्यंहराशिस्थानेदश्यघ्नंसतलवाद्यभागादिकेनखघ्नंसलव्यहाणांकलाद्यंतुंगजं
फलंस्यात्॥उदाहरणं॥रविः ७।२९।३९।५९ रविनीचं ६।१०।०।० अत्ररवौखनीचाच्छोद्धेसतिषड्भाद्व्याधिकमंतरंभवति॥
अथरविनीचेस्मिन् ६।१०।०।० रवेरस्मात् ७।२९।३९।५९ शोधितेसतिजातंषड्भाद्व्याधिकमंतरं १।१९।३९।५९ द्वादशराशि
स्थानेदश्याघ्नंतमागादिकेनंगुणितंजातंकलादिरवेरुच्चबलं १६।३३।१९।४० दद्दरूपस्थाने —स्त्यमुक्तंसलरू
पादिस्यात्॥अत्रसर्वत्रविकलाद्यस्थानेवयवत्रिंशदधिकेष्वेकंतर्हिविकलासेवकार्या॥
न्यूनत्वेतर्हिसत्याज्यः॥एवंकृतेसतिजातंरूपादिरवेरुच्चबलं॥०।१६।३३।एवंचंद्रा
दीनांउच्चबलानिसाध्यानि॥अथवक्ष्यमाणसप्तवर्गबलोपयोगिमूलत्रिकोणान्यनुष्टु

र	च	म	बु	गु	शु	श	
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	उच्चानि
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	नीचानि

नाह॥ सिंहो वृषः क्रियः कन्या धनुस्तौली घटः क्रमात्॥ मूलत्रिकोणसंज्ञाः स्युः सूर्यादीनां नभःसदां॥५॥ इति स्पष्टं॥
अथोच्चमूलत्रिकोणस्वगृहसंदेहनिर्णयस्तु गाथया ह॥ सूर्यभौमगुरुशुक्रशनीनां स्यात्त्रिकोणगृहं धनु स्वां
शैः॥ उच्चे तारविलवैर्हिमभानोरुच्चतः शरलवैः शशिसूनोः॥६॥ सूर्यभौमगुरुशुक्रशनीनां आयुन स्वांशैस्त्रि
कोणगृहं स्यात्॥ हिमांशितलभानवः किरणा यस्य तस्य चंद्रस्योच्चतः अखिललवैः त्रिकोणगृहं स्यात्॥
शशिसूनोः बुधस्य उच्चतः शरलवैः त्रिकोणगृहं स्यात्॥ एतदुक्तं भवति॥ सूर्यस्य सिंहराशिर्मूलत्रिकोणगृहं च॥
तत्र प्रथमविंशतिभागेषु मूलत्रिकोणता॥ अंतिमदशभागेषु स्वगृहता॥ एवं भौमगुरुशुक्रशनीनां मेषधनुस्तु
लकुंभराशिषु प्रथमविंशतिभागेषु मूलत्रिकोणता अंतिमदशभागेषु स्वगृहता॥ तत्र प्रथमत्रिभागेषूच्चता॥
अंतिमसप्तविंशतिभागेषु मूलत्रिकोणता॥ अथ बुधस्य कन्याराशिरुच्चं॥ मूलत्रिकोणस्वगृहं च॥ तत्र प्र
थमदशभागेषूच्चता॥ तदुपरि पंचभागेषु मूलत्रिकोणता॥ अंतिमदशभागेषु स्वगृहता॥ उक्तं च होरा
मकरंदे॥ सूर्यारजीवभृगुभानुजवीनराशेः मूलत्रिकोणपरतः स्वगृहं॥ तुंगांशके स्वेविकलौ च फल
शांकौ मूलत्रिकोणफलदः परतो वृषे स्यात्॥ तुंगांशकेभ्यः शरतुल्यभागमूलत्रिकोणंपरतः स्वभं
स्यात्॥ कन्याबुधस्यापि च पापिधानि तु [illegible] दुश्चिक्यषष्ठगमभानि॥ अथ मेषाद्यधिपान् सूर्यचंद्र
होरे च मालभारिण्याह॥ कुजशुक्रबुधेंदुसौम्याः कुजिदार्क्यशनेश्वराधिपाः॥ अधिपाः क्रियतो रविंदु
होरे विषमे भे धसमे राशौ च होरा॥७॥८॥९॥

॥रव्यादीनां उच्चानि॥	र	चं	मं	बु	गु	शु	श
राशि	०	१	९	५	३	११	६
अंश	१०	३	२८	१५	५	२७	२०
कला	०	०	०	०	०	०	०

॥रव्यादीनां नीचानि॥	र	चं	मं	बु	गु	शु	श
राशि	६	७	३	११	९	५	०
अंश	१०	३	२८	१५	५	२७	२०
कला	०	०	०	०	०	०	०

॥रव्यादीनां उच्चबलानि॥	र	चं	मं	बु	गु	शु	श
	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

कुजो भौमः शुक्रः बुधः इंदुः स्पष्टाः प्रसिद्धाः॥ सौम्यो बुधः आस्फुजित् शुक्रः आरो भौमः इज्यो गुरुः शनिश्चरः प्रसिद्धः
आर्किः शनिः इज्यो गुरुः एते यथाक्रमेण क्रियतः मेषतः द्वादशराशीनां अधिपाः स्युः॥ अथ विषमभे रवींदू
होरे स्यातां॥ समभे राशीन होरे स्यातां चंद्रसूर्यहोरे स्यातां॥ एतदुक्तं भवति॥ होरा नाम राशेरर्द्धभागः॥
मेषमिथुनसिंहतुलधनकुंभविषमराशयः एतेषु प्रथमपंचदशभागेषु रविहोरा अंतिमपंचदशभागेषु पर्यंतं
चंद्रहोरा॥ वृषभकर्ककन्यावृश्चिकमकरमीनसमराशयः एतेषु प्रथमपंचदशभागेषु चंद्रहोरा॥ अंतिम
पंचदशभागेषु सूर्यहोरा॥ अथ द्रेष्काणान् सप्तमांशांश्चानुष्टुभाह॥ आद्यपराणां क्रमेशानां द्रेष्काणाः क्र
मतस्मृताः॥ ओजे स्वभाद्युजे तत्सप्तमात्सप्तमांशकः॥१०॥ आद्यपराणां क्रमेशानां प्रथमपंचनवमरा
शीश्वराणां क्रमतः द्रेष्काणाः क्रमतस्मृताः॥ एतदुक्तं भवति॥ द्रेष्काणो नाम राशेः त्रितियांशः॥ अतः एक
स्मिन् राशौ त्रयो द्रेष्काणाः दशभागप्रमाणा भवंति॥ तत्र प्रथमदशभागेषु तस्यैव राशेरधिपस्य द्रेष्काणः॥
मध्यदशभागेषु तस्मात्पंचमराशेरधिपस्य द्रेष्काणः अंतिमदशभागेषु तस्मान्नवमराशेरधिपस्य द्रेष्काण
स्वामिः॥ यथा मेषराशौ प्रथमदशभागेषु मेषराशेरधिपस्य भौमस्य द्रेष्काणः॥ मध्यदशभागेषु मे
षात्पंचमस्य सिंहस्य स्वामिनः सूर्यस्य द्रेष्काणः अंतिमदशभागेषु मेषान्नवमस्य धनस्य स्वामी गुरुर्द्रे
ष्काणः॥ तथैव वृषादि॥ एवं द्रेष्काणान् उक्त्वा सप्तमांशानाह॥ ओजराशि॥ ओजे विषमराशौ स्वभात्
तस्मादेव राशेः सप्तमांशाः स्युः॥ युजे समराशौ तत्सप्तमांशात् सप्तमो राशिर्भवति॥ एतदुक्तं भवति॥

॥११॥

एकराशेस्त्रिंशद्दंशेषु सप्तभिर्भक्तेषु सप्त चत्वारो भागाः सप्तदश कलाः सप्तमांशस्य प्रमाणं भवति॥ अत एकस्मिन्राशौ सप्त
सप्तमांशा भवंति॥ तत्र विषमराशौ तस्मादेव राशेः सप्तमांशाः स्युः॥ समराशौ तत्सप्तमात् सप्तमांशाः स्युः॥ यथा विषमरा
शौ सप्तदशकलान्वितचतुर्भागस्थापितः प्रथमसप्तमांशो मेषस्वामिनो भौमस्य द्वितीयसप्तमांशो मेषाग्रिमवृषराश्य
धिपस्य शुक्रस्य॥ एवं तृतीयादयः॥ समे वृषभराशौ प्रथमसप्तमांशो वृषात्सप्तमस्य वृश्चिकस्य स्वामिनो भौमस्य द्वि
तीयः सप्तमांशो वृश्चिकाग्रिमधनुषस्वामिनो गुरोः एवं तृतीयादयः॥ सप्तमांशा ज्ञेयाः॥ तथैव कर्ककन्यावृश्चिकमक
रमीनेषु॥ ॥अथ नवमांशद्वादशांशत्रिंशांशानाह स्रग्धरया॥ मेषाद्येषु क्रमेण क्रियमकरतुलाकर्कटाद्या नवांशाः स्व
र्क्षात्स्युर्द्वादशांशा अथ शरपवनाष्टाद्रिपंचोन्मितांशाः॥ त्रिंशांशा ओजराशौ कुजशनिगुरुवित्भार्गवाना मनोजेरा
शौ ते स्युः क्रमात्स्युर्विशद इति बुधैः सप्तवर्गा निरुक्ताः॥ १॥ मेषाद्येषु द्वादशराशिषु क्रमेण क्रियमकरतुलाकर्कटाद्याः
क्रियो मेषः मकरतुलाद्याः प्रसिद्धाः॥ ते आद्या येषामेवं विधा नवांशाः स्युः॥ एतदुक्तं भवति॥ एकराशेस्त्रिंशद्दं
शेषु नवभिर्भक्तेषु लब्धस्त्रयो भागा विंशति कला नवमांशस्य प्रमाणं भवति॥ अत एकस्मिन्राशौ नव नवांशा भ
वंति॥ ते च मेषाद्याः॥ वृषे मकराद्याः मिथुने तुलाद्याः॥ कर्के कर्काद्याः॥ पुनः पर्यावर्त्तनेन सिंहकन्यातुलावृश्चि
केषु तद्वत् नवमांशाः स्युः॥ यथा मेषसिंहधनुःषु विंशतिकलान्वितत्रिभागमिति॥ प्रथमो नवांशो मेषराशेर
धिपस्य भौमस्य द्वितीयो नवांशो मेषाग्रिमवृषभराशेरधिपस्य शुक्रस्य॥ एवं तृतीयादयो नवांशा ज्ञेयाः॥ वृष
कन्यामकरेषु प्रथमो नवांशो मकरराशेरधिपस्य शनैश्चरस्य एवं तृतीयादयो नवांशा ज्ञेयाः॥ मिथुनतुला

एवं

कुंभेषु प्रथमनवांशो तुलाराशेरधिपस्य द्वितीयो नवांशस्तु तदग्रिमवृश्चिकराशेरधिपस्य भौमस्य॥ एवं तृती
यादयो नवांशा ज्ञेयाः॥ कर्कवृश्चिकमीनेषु प्रथमनवांशो कर्कस्य स्वामिचंद्रस्य द्वितीयो नवांशो कर्काग्रिमसिं
हराशेरधिपस्य सूर्यस्य॥ तृतीयादयो नवांशा ज्ञेयाः॥ एवं नवांशानुक्त्वाथ द्वादशांशानाह॥ स्वर्क्षादिति॥
स्वर्क्षात्तस्मादेव राशेर्द्वादशांशाः स्युः॥ एतदुक्तं भवति॥ एकराशेस्त्रिंशदंशेषु द्वादशभेदेषु सत्सु द्वौ भागौ त्रिंशत्क
लाः द्वादशांशस्य प्रमाणं भवति॥ अतः एकस्मिन्राशौ द्वादश द्वादशांशाः भवंति॥ ते च स्वस्मात्तस्मादेव राशेः स्युः॥
यथा मेषस्याद्यद्वयं अत प्रथमो द्वादशांशो मेषराशेरधिपस्य भौमस्य॥ द्वितीयो द्वादशांशो मेषाग्रिमवृषभराशे
रधिपस्य शुक्रस्य॥ एवं तृतीयादयो ज्ञेयाः॥ तथैव वृषभादिषु॥ एवं द्वादशांशानभिधाय॥ त्रिंशांशानाह॥ अथे
ति॥ अथ द्वादशांशकथनानंतरं॥ ओजराशौ विषमराशौ कुजशनिगुरुवित्भार्गवानां शरपवनाष्टाद्रिपंचो
न्मितांशास्त्रिंशांशाः स्युः अनोजे समराशौ ते त्रिंशांशाः व्युत्क्रमात् वैपरीत्येन स्युः॥ एतदुक्तं भवति॥ त्रिंशतो
योंशाः पंचादिपरिमिता भागाः स त्रिंशांशः स्युः स्यात्॥ दृष्टोदरादित्वात्तकारलोपः॥ मेषमिथुनसिंहतुलाध
नुःकुंभविषमराशयः एतेषु पंचभागमितस्त्रिंशांशः कुजस्य तदग्रिमपंचभागमितस्त्रिंशांशः शनेः त
दग्रिमाष्टभागमितस्त्रिंशांशः गुरोः तदग्रिमसप्तभागमितः त्रिंशांशो बुधस्य तदग्रिमपंचभागमि
तस्त्रिंशांशो भार्गवस्य॥ वृषकर्ककन्यावृश्चिकमकरमीनाः समराशयः एतेषु प्रथमपंचभागमितस्त्रिं
शांशो [illegible]॥ भार्गवस्य॥ वृषकर्ककन्यावृश्चिकमकरमीनाः समराशयः एतेषु प्रथमपंचभागमितस्त्रिंशां

चंद्रस्तु ॥१२॥

शोत्मार्गवस्य॥तद्दशमसप्तभागमितस्त्रिंशांशोधिपः॥तद्दशमाष्टभागमितस्त्रिंशांशोगुरोः तद्दशमपंचभा
गमितस्त्रिंशांशाः शनेः तद्दशमपंचभागमितस्त्रिंशांशाः कुजस्य॥इतिपूर्वोक्तप्रकारेणबुधैरिहहोराद्रेष्काणसप्त
मांशनवमांशद्वादशांशत्रिंशांशरूपोविषयः॥सप्तवर्गोनिरूक्तः॥अथग्रहाणांनैसर्गिकैरुदुहसमानशत्रुत्वं
त क्रमेणप्रमाणिकैर्यास्यागतयाभुजंगप्रयातेनदोहकेनचाह॥नभःसदांनिसर्गजाःसुरानतैःसमीरिताःसु
हृत्समानशत्रुतामयाधुनानिगद्यते॥१०॥चंद्रभौमगुरवोरविसौम्यौसूर्यचंद्रगुरवोरविभुक्तौ॥सूर्यमित्रं बुधक्रमात्
कुजोबुधमंदास्त्र्यंसुरोगुजासुहृदोर्कात्॥११॥बुधोभौमवागीशशुक्रार्कपुत्राःसितार्किकुजेज्याःकुजाः
सूर्यसुनुः॥धरानंदनेज्यासुरेज्यःसदेवक्रमात्स्युःसमाःपद्मिनीप्राणनाथात्॥१२॥शुक्रशनीगगनेबु
धइंदूसौम्यशितोदिवसेशनिशेशौ॥पंकजनीपतिइंदेमहीजापंकजेनिपतिनोरिपवस्युः॥१३॥स्प
ष्टार्थः॥अथग्रहभावसंधिसाधनमाह॥मंदाक्रांतेपाह॥सखेटांगस्याक्रहतेइनवद्वात्रिखंडप्रसाध्यंतस्मि
न्लग्नेगगनचरतोभ्यक्षदेशोदयैर्यत्॥तत्त्र्यंस्यातेनउदितवच्छेषभावाविधेयास्तत्राबग्रहचलनतःखे
टतत्कालमैत्री॥१४॥यस्यग्रहस्यभावाःसाध्यंतेसखेटः अंगलग्नंस्यात्॥अथग्रहतःइनवाविर्यंवत्त्रराज्ञि
खंडप्रसाध्यंयथासायनसूर्यात्चरमानीयपरात्रिखंडप्रसाध्यते॥तद्वत्सायनग्रहात्चरमानीपरात्रिखंडप्रसा
ध्यमित्यर्थः॥अथतस्मिन्तात्रिखंडेगगनचरतःग्रहात्॥व्यक्षदेशोदयैःलंकोदयैःपतुक्रमितंलग्नंतच्च
यंचतुर्थंस्यात्॥वहोद्धवरात्रिखंडंइष्टकालंप्रकल्प्यतस्माद्वेसायनाग्रहात्भोग्यांशक्रमणलंको
दयैःपतुलग्नंचतुर्थंस्यादितिअर्थः॥अत्रत्रात्रिखंडंलग्नानयनार्कःषड्राशियुक्तोनविधेयःततःनाप्यामिति

राशीश स्तूर्यकु

॥१२॥

ततःस्पष्टचतुर्थाभ्यामित्यर्थः॥उदितवत्तनुभावविवयुक्तचतुर्थभावादिस्याद्युक्तवत्शेषभावाःसंधयश्चविधेयाः॥एवंसि
द्धानांग्रहभावसंधीनांप्रयोजनमाद्यचलदिति॥तद्भावयदचालनलस्वेषुतेषुभावेषुग्रहचालनतःग्रहवीर्यतत्तीयस्वेन
वक्ष्यमाणखेटतत्कालमैत्रीज्ञेया॥अथग्रहभावचालितग्रहणानकेवलताकालिकमैत्र्यांकिलदशासुपाचकैरदं
पृथक्पृथक्कृततेनभोगभावचालनंसदोपयुक्तमयतोदशासुपाचकेषुच॥१२॥२ चपीतिप्रमाणिकयाह॥२ इदंनभो
गभावचालनंभावेषुचालनंभावचालनंनभोगानांग्रहाणांभावचालनंयस्यथकपृथकृतंततत्अयतःस्पष्टोर्दयुस्य
वीर्यमधिकमितिवक्ष्यमाणासुदशासुदलमेकमणग्रिकोण + गइतिवक्ष्यमाणेषुवत्सदोपयुक्तमस्ति॥उदाहरणं॥जन्मका
लग्नस्पष्टः ४।१२।१०।१६ अयमेवतनुभावःसायनस्पष्टः ५।०।१५।१६॥अस्यभुजः ०।२९।४४।४४ अस्यराशिमुखस्पगतखंडयोगः०
भोग्यखंडं ८५ अनेनभुजभागादि २९।४४ गुणितंजातं १७।१८ अस्यखाग्नि ३० भागेजातं ४४ अस्यमितखरखंडयोगोयुक्तःसन्
जातंचरंपलात्मकं ४४ इदंसायनस्पष्टस्योत्तरगोलत्वात्संचदशघटीषुयोजितःसन्जातंदिनार्धं १५।४४ इदंत्रिंशच्युतंजातं
रात्रिखंडं १४।१६ सायनस्पष्टः ५।०।१५।१६ अस्यभोग्यभागैरेभिः २९।४४।४४ सायनस्पष्टक्रांतकन्याराशोर्लंकोदयं २७८ गुणि
तस्त्रिंशद्भक्तःसन्जातःस्पष्टभोग्यकालःपलात्मकः २७५ अस्मिन्चन्द्रभोग्यकालंवंद्रोस्यरात्रिखंडस्यास्य १४।५६ पलअजाद
स्मात् ८९६ शोधितेसतिशेषं ५८० अस्मात्कन्याग्रिमस्तुलाराशेर्लंकोदयस्मिन् २९ शोधितेसतिशेषं २ अस्मादग्रिमको
ग्रिमधनुराशेर्लंकोदयेस्मिन् २२ नशुध्यतिअतःशेषमिदं ४ खरामघ्नं १२० इदमस्मुद्ध धनुराशेर्लंकोदयेनानेन ३२ भक्तंस
त्लब्धंभागादिकं ०।२।१७ इदमशुद्धधनुराशेःपूर्वैर्मेषादिभिरष्टराशिभिरस्यर्ध्वंमाध्यं ७।२२।१७ इदमयनांशहीनंसन्जातं
स्फुटंस्फुटं ७।१२।९।७।१७ अयमेवचतुर्थभावःतनुभावोनश्चतुर्थभावः ३।०।७।१ अस्यषष्ठांशः ०।१५।११।० अनेनतनुभावेस्मिन्

...।१२।१९।१९ युक्ते सति जातस्तनुभावाग्निमः संधिः ७।१२।७।१७।२६ अस्मिन् षष्ठांशेन युक्ते सति जातो धनभावः ८।१२।१२।३६ अस्मिन् षष्ठांशेन युक्ते सति जातो धनभावाग्निमः संधिः ८।२७।१३।१६ अस्मिन् षष्ठांशेन युक्ते सति जातो सहजभावः ९।१२।१४।५९ अस्मिन् षष्ठांशेन युक्ते सति जातो सहजभावाग्निमः संधिः ९।२७।१६।२१ एकराशिविशुद्धः षष्ठांशः ०।१।४२।३० अनेन चतुर्थभावे स्मिन् ७।१२।१७।१८ युक्ते सति जातः चतुर्थभावाग्निमः संधिः ७।२७।१९।७ अस्मिन् एकराशिविशुद्धेन षष्ठांशेन युक्ते सति जातः सुतभावः ८।१२।२१।१५ अस्मिन् एकराशिविशुद्धयुक्ते सति जातो सुतभावाग्निमः संधिः ८।२७।२३।... अस्मिन् एकराशिविशुद्धे सति जातो रिपुभावः ९।१२।२२।२३ अस्मिन् एकराशिविशुद्धयुक्ते सति जातो रिपुभावाग्निमः संधिः ९।२७।२२।२७ एते षड् भावाः षट् संधयश्च षड् राशियुक्ताः संतः अग्रिमा जायादयः ससंधयः षड्भावाः भवंति एवं रविभौमबुधगुरुभृगुशनैश्चराणां भावाः संधयश्च साधनीयाः॥

युक्ते ५९३॥

रविभावाः संधयः ।राशिखंडं १६।३०॥

त	ध	स	सु	सु	रि	जा	म	ध	क	आ	व्य
७।२२।३२।५२	८।२।२६।२८	९।४।५२।५८	११।३।२८।३२	०।४।५३।१	१।२।१८।३२	१।२२।३२।५२	२।२।२६।२८	३।४।५२।५८	४।३।२८।३२	५।४।५३।१	६।२।१८।३२
७।१५।२८।१४	८।१८।३४।४४	१०।२१।२१।१४	११।२१।२१।२६	०।१८।३४।४६	१।१५।४८।१६	१।१५।५८।१४	२।१८।३४।४४	४।२१।२१।१४	५।२१।२१।१६	६।१८।४८।४६	७।१५।५८।१६

चंद्रभावाः संधयः राशिखंडं १४।१६

त	ध	स	सु	सु	रि	जा	म	ध	क	आ	व्य
४।१२।२०।१६	५।१२।१२।३६	६।१२।२४।५२	७।१२।१६।१८	८।१२।२८।५८	९।१२।३२।३८	१०।१२।२०।१६	११।१२।१२।३६	०।१२।२४।५२	१।१२।१६।१८	२।१२।२८।५८	३।१२।३२।३८
४।२७।११।२८	५।२७।४०।४८	६।२८।१२।६	७।२७।१६।६	८।२७।१३।३७	९।२७।११।२८	१०।२७।११।२८	११।२७।१३।४८	०।२८।१२।६	१।२७।१६।६	२।२७।१३।३७	३।२७।११।२७

भौमभावाः संधयः राशिखंडं १५।४२

त		ध		स		सु		सु		रि	
६।१०।१२।१२	६।२५।२८।२६	७।१०।१९।५२	७।२५।२६।५२	८।१०।२६।११	८।२५।२५।२६	९।१०।१९।१५	९।२५।२६।५८	१०।१०।१६।११	१०।२५।२६।४२	११।१०।२०।१५	११।२५।२६।१२

जा		म		ध		क		आ		व्य	
०।१०।१९।१२	०।२५।२८।२६	१।१०।१९।५२	१।२५।२८।५२	२।१०।२६।११	२।२५।२५।२६	३।१०।१६।४१	३।२५।२६।५८	४।१०।१६।११	४।२५।२८।२६	५।१०।१०।११	५।२५।२६।४८

बुधभावसंधयः राशिखंडं १६।३५

त	ध	स	सु	सु	रि	जा	म	ध	क	आ	व्य
८।१३।५८।२८	९।१७।३२।५३	१०।२४।५।५४	११।२४।३८।२	०।२१।३२।५४	१।२६।५२।५३	२।१३।५८।२८	३।१६।३२।५३	४।२१।५।५४	५।२४।३८।५३	६।२१।३२।४०	७।१६।३२।५३
८।०।४६।२१	९।४।२८।२१	११।२।५२।२८	०।२।२२।२८	१।४।१८।३५	२।०।४६।२१	३।०।४६।२१	४।४।१८।३५	५।२।५२।२८	६।३।५२।२८	६।४।२८।३५	८।०।४६।२१

गुरुभावसंधयः राशिखंडं १२।०॥

त	ध	स	सु	सु	रि	जा	म	ध	क	आ	व्य
११।१२।२८।४४	०।१२।१८।५४	१।१२।१८।४	२।१२।१०।१८	३।१२।२८।७	४।१२।२८।५८	५।१२।१२।४४	६।१२।२८।५४	७।१२।२८।४	८।१२।१०।१८	९।१२।१८।७	१०।१२।२८।५८
११।२७।१८।१२	०।२६।२८।२२	१।२७।१८।३८	२।२७।२८।४२	३।२६।२८।३२	४।२७।१८।२२	५।२७।१८।१८	६।२६।२८।२२	७।२६।१२।३८	८।२७।२८।४२	९।२७।२८।३२	१०।२६।२८।२२


भृगुभावसंधयः राशिखंडं १६।२९

त	ध	स	सु	सु	रि	जा	म	ध	क	आ	व्य
७।२८।२२।५८	८।२।१८।१	९।२०।४८।३३	११।२१।३३।३	०।३।२८।३१	१।२।२५।५८	१।२८।२२।५८	३।२।१८।१	४।४।२८।३३	५।२१।३३।३	६।४।२८।३१	७।२।२५।५८
८।१५।५३।४५	९।१८।३२।४०	१०।२१।६।२८	११।२१।६।१७	०।१८।३२।४५	१।१५।५२।४३	२।१५।५२।२३	३।१८।३२।४७	४।२१।६।१८	५।२१।६।२८	६।१८।३२।४५	७।१५।५८।४३

शनिभावाः संधयः राशिखंडं १६।२८

त	ध	स	सु	सु	रि	जा	म	ध	क	आ	व्य
८।२८।५८।२	१०।३।२८।५४	११।५।५८।४८	०।६।८।४०	१।७।५४।४८	२।३।०।५६	२।२८।५८।२	४।३।०।५८	५।५।५८।४०	६।११।८।४०	७।५।४८।५६	८।३।४।५६
९।२५।५८।५८	१०।२०।३।५०	११।२४।७।४२	०।२४।७।४४	१।२०।३।५२	२।१५।०।०	३।१५।५८।५८	४।२०।३।५०	५।२४।७।४२	६।२४।७।४४	७।२०।३।५२	८।१६।०।०

रविकुंडलिका चंद्रकुंडली मंगलकुंडली बुधकुंडली गुरुकुंडली शुक्रकुंडली शनिकुंडली



॥१४॥

२ ३ ४ १० ११ १२

अथ ग्रहाणां तात्कालिकरूपं त्रिमालभारिण्याह ॥ ग्रहतोऽर्थतृतीयतोयखायव्ययसंस्थाः सुहृदो नभश्चराः स्युः ॥ इतरा
लयगा द्विषो मुनीन्द्रैरिति तत्कालजमित्रशत्रुतोक्ता ॥१६॥ ग्रहतोऽर्थं तृतीयतोयखायव्ययसंस्थाः अर्थो द्वितीयं तृ
तीयं प्रसिद्धं तोयं चतुर्थं खं दशमं आयं एकादशं व्ययं द्वादशं एतेषु स्थानेषु संतिष्ठंति स्थितास्ते नभश्चरा ग्रहाः
सुहृदः स्युः । इतरालयगा अन्यस्थानगाः नभश्चराः द्विषः स्युः ॥ इति तत्कालमित्रशत्रुतत्कालजौ यौ मित्रशत्
नयोर्भावस्तत्र मुनीन्द्रैरुक्ता ॥ एतदुक्तं भवति ॥ यस्माद्ग्रहात् ये ग्रहाः तद्भावकुंडल्यां द्वितीयतृतीयचतुर्थदशमै
कादशस्थानगाः ते तस्य सुहृदः स्युः ॥ प्रथमपंचषष्ठसप्तमाष्टमनवमस्थानगाः ते शत्रवः स्युः ॥ यथा च सूर्यभा
वकुंडल्यां सूर्याद्द्वितीयस्थाने शनिरस्ति चतुर्थस्थाने गुरुरस्ति एकादशस्थाने भौमोऽस्ति अत एते त्रयः सूर्यस्य सुहृ
दः ॥ अथ बुधशुक्रौ प्रथमस्थाने वर्तते चंद्रो नवमस्थाने वर्तते अतः एते त्रयः सूर्यस्य वैरिणः स्युः ॥ एवं चंद्रादीनां स
स्वभावकुंडल्यां तात्कालमित्रशत्रवो ज्ञेयाः ॥ अथ ग्रहाणामधिमित्रत्वादिभेदं मालभारिण्याह ॥ अधिमित्रस
मत्वमेति मित्रं समता चेत् सुहृद्द्विषुत्वमेति ॥ रिपुरेति समाधिशत्रुभावं खलु तत्कालजमित्रशत्रुभावात् ॥१७॥
नैसर्गिकं मित्रं तत्कालजमित्रशत्रुभावात् तत्कालजौ ज्ञेयौ ॥ मित्रशत्रुतयोर्भावस्तस्मात् अधिमित्रसमत्वं चैत
त्येव तु निश्चयेनेति प्राप्नोति तु पुनः नैसर्गिकः समश्चेद्भवः तत्कालजमित्रशत्रुभावात् सुहृद्द्विषोर्भावः सुहृद्द्विषुत्वं
तत् एति प्राप्नोति ॥ अथ नैसर्गिको रिपुः तत्कालजमित्रशत्रुभावात् समाधिशत्रुभावं समत्वं अधिशत्रुत्वं समाधि
शत्रुत्वयोर्भावस्तं प्रति प्राप्नोति ॥ एतदुक्तं भवति ॥ नैसर्गिकः सुहृत् तात्कालिकमित्रत्वात् अधिमित्रं भवति ॥ तात्का
लिकशत्रुत्वात् समो भवति ॥ नैसर्गिकः समस्तात्कालिकमित्रत्वात् मित्रं भवति ॥ तात्कालिकशत्रुत्वात् शत्रुर्भवति ॥ अधि

एति

ने

तात्कालिकमैत्री चक्रं

र	च	मं	बु	गु	शु	श
शमं गु	मं	रचं शुश	रमं शुगु	रबु गुश	गुमं श	रबु गुशु
बु शु चं	बुश गुर शु	गु	श च	रचं बु	रचं बु	चं

यथा भौमगुरू सूर्यस्य नैसर्गिकौ सुहृदौ तात्कालिकौ तात्कालिकौ च सुहृदौ वर्तते ॥ अत एतौ
अधिसुहृदौ जातौ ॥ चंद्रः सूर्यस्य नैसर्गिकः सुहृत् तात्कालिकः शत्रुः अतोऽसौ समो जातः ॥ बुधः सू
र्यस्य नैसर्गिकः समस्तात्कालिकः शत्रुः अतोऽसौ शत्रुर्जातः ॥ सूर्यस्य नैसर्गिकः शुक्रः शत्रुः ता
त्कालिकश्च शत्रुः अतोऽसौ अधिशत्रुर्जातः ॥ शनिः सूर्यस्य नैसर्गिकः शत्रुस्तात्कालिकः सु
हृत् ॥ अतोऽसौ समो जातः ॥ एवं चंद्रादीनां अधिमित्रादयो ज्ञेयाः ॥ अथ रूपादि सप्तवर्गबलं
मालभारिणीश्यामनुष्टुभाह ॥ गगनं पवनाश्वयः त्रिकोणे गगनं पूर्णहुताशनाः स्वगेहे ॥ अधिसुमित्रगृहे नभो
द्विदस्ताः स्वगुणा मित्रगृहे नभोऽक्षचंद्राः ॥१८॥ गृहे त्रिकोणे प्रागुक्ते स्वमूलत्रिकोणे संनिरूपस्थाने गगनं शून्यं पवना
श्वयः पंचचत्वारिंशत्कलाः बलं स्यात् ॥ गृहस्य गेहे संनिरूपस्थाने गगनं पूर्णहुताशनाः त्रिंशत्कलाः बलं स्यात् ॥
ग्रहे अधिमित्रगृहे सति रूपस्थाने नभः शून्यं द्विदस्ताः द्वाविंशतिकलाः स्वगुणाः त्रिंशत्कला बलं स्यात् ॥ ग्रहे मित्रग
हे सति रूपस्थाने नभः शून्यं अक्षचंद्राः पंचदशकलाः बलं स्यात् ॥ समभे गगनं नगाः खरामा रिपुभे खं दहनाः समीरवेदाः ॥ अधिश
त्रुगृहे नभः शशांको द्विशराः अन्यकुताशनाः बलं स्यात् ॥१९॥ ग्रहे समभे सति गगनं नगाः सप्तकलाः खरामास्त्रिंशद्विकलाः
बलं स्यात् ॥ ग्रहे रिपुभे सति रूपस्थाने खं शून्यं दहनास्त्रयः कलाः समीरवेदाः पंचचत्वारिंशद्विकलाः अन्यकुताशनास्त्रिंश

त्रिं	स्व	अमि	मि	सम	श	अश
०	०	०	०	०	०	०
४५	३०	२२	१५	७	३	१
०	०	३०	०	३०	४५	५२

त्रिकोणादिबलं

द्विकलाश्चावयवः बलं स्यात् ॥ एवं होरादिकेऽपि बलं स्वेशवशाद्भवेत् ॥ सप्तवर्गं विधायादौ पश्चा
देतद्विचारयेत् ॥२०॥ एवं होरादिके होराद्रेष्काणसप्तमांशनवमांशद्वादशांशत्रिंशांशरूपेऽपि व
र्गे स्वेशवशात् स्वपतिवशाद्बलं भवेत् ॥ तदुक्तं भवति ॥ अत्र होरादिके वर्गे मूलत्रिकोणाकं बलं

द्वि

नरगास्तं॥ प्राचीनसंप्रदायात्॥ अन्यस्वगेहोक्तं सर्वबलं ज्ञेयं॥ तद्यथा स्वस्य होरादिके वर्गे स्वगेहोक्तं बलं ज्ञेयं॥ अधिमि-
त्रस्य होरादिके वर्गे अधिमित्रगृहोक्तं बलं ज्ञेयं॥ मित्रस्य होरादिके वर्गे मित्रगृहोक्तं बलं ज्ञेयं॥ समस्य होरादिके वर्गे स-
मगृहबलं ज्ञेयं॥ रिपुहोरादिके वर्गे रिपुगृहोक्तं बलं ज्ञेयं॥ अधिशत्रोर्होरादिके वर्गे अधिशत्रुगृहोक्तं बलं ज्ञेयं॥
केचित्स्वेशावशादि स्येतत् अन्यथान्यच स्वते॥ तद्यथा॥ ग्रहो यस्मिन् गृहे स्थित गृहेशः स्वमूलत्रिकोणे चेत् गगनं पवना
ब्धयः बलं॥ तद्गृहेशः स्वगेहे चेत् तर्हि गगनं पूर्णकृताग्नाना बलं॥ एवमन्येपि॥ अथग्रहो यस्यां होरायामस्ति तद्धोरेशः
स्वस्वमूलत्रिकोणे चेत् तर्हि गगनं पवनाब्धयः बलं॥ होरेशः स्वगेहे चेत् तर्हि गगनं पूर्णकृताग्नाना बलं॥ एवमन्येपि॥ द्रे-
ष्काणादिष्वेवमेव॥ आदौ सप्तवर्गं विधाय पश्चात्तत्सप्तवर्गे बलं विचारयेत्॥ उदाहरणं॥ सप्तवर्गोदाहरणं॥ स-
प्तवर्गबलोदाहरणं च सेहे व क्रियते॥ रविः ७।२२।१३।१५।१। अयं वृश्चिकोस्ति तत्स्वामी भौमः स रवेरधिमित्रं अतो
रविरधिमित्रगेहे स्थित तद्बलं नभः ० द्विदस्त्राः २२ स्वगुणाः ३०॥ वृश्चिकः समराशिः तस्याद्य राहुर्रविरस्ति॥ अतः स्व
होरायां रविः तद्बलं गगनं पूर्णकृताग्नाना ३०। वृश्चिके अंतिम द्रेष्काण भागमध्ये रविरस्ति॥ अतो वृश्चिकात्त्रवमस्य क-
र्कराशेर्द्रेष्काणे स्थित स्वामी चन्द्रः स रवेः समः अतः समद्रेष्काणे रविरस्ति तद्बलं गगनं
नगाः ७ स्वरामाः ३७ वृश्चिके समराशौ एकोनत्रिंशांशः संलिखतमे सप्तमांशे रविरस्ति॥ अतो
वृश्चिकात्सप्तमो वृषराशिः तस्मात्सप्तमांशः गणनया अंतिमः सप्तमांशो वृश्चिकस्य
वनवति तत्स्वामी भौमः स रवेरधिमित्रं॥ अतो रविरधिमित्रसप्तमांशे रास्ति॥ तद्बलं न-
भः ० द्विदस्त्राः २२ स्वगुणाः ३०। वृश्चिके अंतिम नवमांशे रविरस्ति॥ वृश्चिके कर्कोधानवमा

अथ अधिमित्रादि चक्रं लिख्यते॥

र	चं	मं	बु	गु	शु	श	ग्रह
मंगु	०	रचं	रबु	र	श	बुशु	अधि
०	मं	शुशमंगु	श	मं	गु		मित्र
चंश	रबु	गुशु	०	बुमं बुशु	चबु	रमं	सम
बु	गुशु	०	श	०	गु	०	शत्रु
शु	०	०	चं	०	र	चं	अशत्रु

मांशाः संति अतः कर्कान्नवमांशगणनया अंतिमो नवमांशो मीनस्य भवति तत्स्वामी गुरुरस्ति स रवेः अधिमित्रं अ-
तः रविरधिमित्रनवमांशे स्थित तद्बलं नभः ० द्विदस्त्राः २२ स्वगुणाः ३०॥ वृश्चिके अंतिमे द्वादशांशे रविरस्ति वृ-
श्चिके वृश्चिकाद्या द्वादशांशाः संति अतो वृश्चिकाद्द्वादशांशगणनया अंतिम द्वादशांशो राहुस्तुलायां भवति
तत्स्वामी शुक्रः स रवेरधिशत्रु अतो अधिशत्रु द्वादशांशे स्थित तद्बलं नभः ० रामाः कः ० द्विद्बाणाः ५२ शुभ्रकृता
तत्स्वामी शुक्रः स रवेरधिशत्रु अतो अधिशत्रु द्वादशांशे ... अतो अधिमित्रत्रिंशांशे
रानाः ३० वृश्चिके समराशौ अंतिमे त्रिंशांशे रविरस्ति तत्स्वामी भौमः स रवेरधिमित्रं॥ अतो अधिमित्रत्रिंशांशे
स्थित तद्बलं नभः ० द्विदस्त्राः २२ स्वगुणाः ३०॥ एवं चंद्रादीनां॥ सप्तवर्गबलं ज्ञेयं॥ अथ सप्तराश्यादि बलं तोटकेनाह॥

ग्र	र	चं	म	बु	गु	शु	श
गृ	म ८ अमि	र [illegible]	शु मित्र	गु मित्र	गु १२ सम	बु ८ मित्र	गु ८ अमि
हो	स ५	र ५ सम	र ५ अमि	र ५ मित्र	चं सम	र अशत्रु	चं अश
द्रे	चं ८ सम	गु [illegible]	श ११ मित्र	म ७ मित्र	चं सम	र अश	र सम
सप्त	म ८ अमि	शु शत्रु	गु ८ सम	गु १२ मित्र	म ८ सम	म ८ मित्र	बु ७ अमि
न	गु १२ अमि	[illegible]	श [illegible] मित्र	र ५ अमि	[illegible] सम	[illegible]	श ८ मित्र
द्वा	शु ७ अश	शत्रु	श [illegible] मित्र	शु २ अमि	चं सम	[illegible] सम	म ८ सम
त्रिं	म ८ अमि	गु शत्रु	गु ८ सम	बु ८ मित्र	स ०	म १ मित्र	शु २ अमि

रविरधिमित्रत्रिंशांशे स्थित तद्बलं नभः ० द्वि द-
स्त्राः २२ स्वगुणाः ३०॥ एवं चंद्रादीनां सप्तव-
र्गस्य सप्तवर्गबलं ज्ञेयं॥ अथ सप्तरा-
श्यादिबलं तोटकेनाह॥ समराशिग-
तो समभागगतो दिशतोधिमितं ब-
लं मिंदुसितौ॥ विषमर्क्षगतो विष-
मांशगतो रतरे वितरंति हि पाद ब-
लं॥ १॥ समराशिगतो चंद्रभृगुको
प्रत्येकं अधिमित बलं दिशतः॥
तथा समभागगतो समराशि नवां-
शे तो चंद्रभृगुको अधिमित बलं दिशतः॥ (

अथ सप्तवर्गवलं चक्रं लिख्यते॥ बल

	र	चं	म	बु	गु	शु	श
गृ	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
हो	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
द्रे	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
स	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
न	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
द्वा	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
त्रिं	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

समनवांशस्थितौ

समराशिस्थितौ चतौ प्रत्येकं अंघ्रिद्वयमितं बलं ददाति तत्र स्पष्टार्थः सिद्धं॥ विषमर्क्षगताः विषमराशिस्थिताः इतरे रविभौमबुधगुरुशनिश्वराः हीतिनिश्चयेन प्रत्येकं पादबलं पंचदशकलामितं बलं वितरंति प्रयच्छंति॥ तथा विषमांशगताः विषमराशिनवांशगताः इतरे प्रत्येकं पादबलं वितरंति॥ अत्रापि विषमर्क्षगताः विषमांशगताश्च इतरे प्रत्येकं पादमितं बलं वितरंतीत्यर्थात्सिद्धं॥ उदाहरणं॥ अत्र चंद्रो विषमसिंहे तिष्ठति कर्कस्य समराशेर्नवांशे तिष्ठति अतः चंद्रो अंघ्रिमितं बलं ०।१५।० शुक्रो वृश्चिके समराशौ मिनांशे समराशिनवमांशे च तिष्ठति॥ अतः शुक्रस्य अंघ्रिद्वयमितं बलं ०।३०।० एवं यथासंभवं स्थानादिजं बलं ज्ञेयं॥ अथ तत्वादिभावानां केंद्रपणफरसमाकेंद्रपणफरापोक्लिमसंज्ञामनुष्टुभाह॥ लग्नाबुस्त्रीखभावानां केंद्रसंज्ञा समीरिता॥ केंद्रात्परं पणफरमापोक्लीमं ततः परं॥ २२॥ केंद्रस्थानस्थितो रूपं दलं पणफरस्थितः॥ आपोक्लीमस्थितः खेटो ददात्यंघ्रिमितं बलं॥ २३॥ तनुभावकुंडल्यां केंद्रस्थाने स्थितः खेटः रूपं षष्टिकलामितं बलं ददाति॥ पणफरस्थितः खेटः बलं तदर्द्धं त्रिंशत्कलामितं बलं ददाति॥ आपोक्लीमे स्थितः खेटः बली अंघ्रिमितं पंचदशकलामितं बलं ददाति॥ उदाहरणं॥ अत्र तनुभावकुंडल्यां भौमः केंद्रस्थः॥ अतः तद्बलं रूपं १॥ रविशुक्रचंद्राः पणफरे संति अतः तद्बलं दलं ०।३०।० गुरुबुधशनैश्चराः आपोक्लीमे संति अतः तद्बलं अंघ्रिमितं ०।१५।० अथ द्रेष्काणादिबलं भुजंगप्रयातेनाह॥ अथाद्ये द्रेष्काणे नरा भूपुत्रजीवाः प्रयच्छंति पादोन्मितं वीर्यमत्र॥ द्वितीये बुधाकीं तृतीये सितेंदू रतिस्थानसंज्ञं बलं पंचधोक्तं॥ २४॥ अथ नरा अर्कभूपुत्रजीवाः अत्राद्ये द्रेष्काणे पादोन्मितं पंचदशकलामितं वीर्यं बलं प्रयच्छंति॥ बुधार्की बुधशनी द्वितीये द्रेष्काणे

केंद्रादिबलं लिख्यते

र	च	म	बु	गु	शु	श
०	०	१	०	०	०	०
३०	३०	०	१५	१५	३०	१५
०	०	०	०	०	०	०

समराश्यादिबलं

र	चं	म	बु	गु	शु	श
०	०	०	०	०	०	०
०	१५	१५	३०	१५	[illegible]	[illegible]
०	०	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

पादोन्मितं वीर्यं प्रयच्छतः॥ सितेंदू शुक्रचंद्रौ तृतीये द्रेष्काणे पादोन्मितं वीर्यं प्रयच्छतः॥ रतिस्थानसंज्ञं बलं पंचधा॥ प्रथमं मुख्यं बलं द्वितीयं सप्तवर्गबलं तृतीयं समराश्यादि चतुर्थं केंद्रादिबलं पंचमं द्रेष्काणबलमिति पंचप्रकारमुक्तं॥ उदाहरणं॥ अत्र अर्कभौमगुरवः आद्ये द्रेष्काणे न संति अतस्तेषां द्रेष्काणबलं न॥ बुधो द्वितीये द्रेष्काणेऽस्ति अतस्तद्बलं पादमितं ०।१५।० शनिर्द्वितीये द्रेष्काणे नास्ति अतः तस्य द्रेष्काणबलं न॥ शुक्रः स्तृतीये द्रेष्काणेऽस्ति अतः तद्बलं पादमितं ०।१५।० चंद्रस्तृतीये द्रेष्काणे नास्ति अतस्तस्य द्रेष्काणबलं न॥ अथ दिग्बलसाधनं मनुष्टुभः॥ स्रग्विण्या प्रमाणिकयाह॥ भौमभान्वोश्चतुर्थेन जीवज्ञयोः सप्तमेनास्फुजिच्चंद्रयोः कर्मणा॥ भानुसूनोर्विलग्नेन साद्धं तथा कार्यमेवांतरं षड्गृहीनं॥ २५॥ भौमभान्वोश्चतुर्थेन सुहृद्भावेन सार्द्धं जीवज्ञयोः सप्तमेन जायाभावेन सार्द्धं॥ आस्फुजिच्चंद्रयोः कर्मणा दशमभावेन सार्द्धं भानुसूनोर्विलग्नेन सार्द्धं मंतरं यथा षड्गृहीनं भवेत्तथैव कार्यं॥ २७॥ ग्रहे हि नरं दृशा हृतं लब्धादिकेन खाहतं॥ कृतादिदिग्बलं भवेद्बुधैस्तदैक्यधोदितं॥ २६॥ तदंतरं गृहराशिस्थाने दशाहृतं लब्धादिके भागाद्येन खाहृतं सत्कलादिदिग्बलं भवेत्॥ बुधैस्तत्तु एकधा एकप्रकारसुदितं॥ उदाहरणं॥ रवि ७।२९।३९।१९ सुहृद्भावः १।१७।२६।१७ अनयोः षड्गृहीनमंतरं ६।१२।१३।२ इदं राशिस्थाने दशगुणितं जातं रवेः कलादिदिग्बलं १५।५५।२२।४० बलं रूपेस्थाने शून्यं युक्तं सत् जातं रवेः रूपादित्रिस्थं बलं ०।१५।५५ एवं चंद्रादीनां साध्यानि॥ अथ चतुर्विधमध्ये प्रथमं नतोदिवाख्यं बलसाधनं भुजंगप्रयातेनाह॥ द्विनिघ्नोन्नतं भुक्सभास्वद्गुरूणां कलाद्यं बलं स्यात्सुपुष्टिः सदेव॥ द्विनिघ्नं नतं चंद्रभौमार्कजानां बुधे स्तं निरुक्तोन्नतं वा स्व॥ २७॥

र	चं	म	बु	गु	शु	श
०	०	०	०	०	०	०
०	०	०	०	०	०	०
०	०	०	१५	०	२५	०
०	०	०	०	०	०	०

अथ द्रेष्काणबलं लिख्यते

र	चं	मं	बु	गु	शु	श
०	०	०	०	०	०	०
१५	८	३२	४०	११	४४	२४
५५	१५	२२	५२	३२	५	२

एकविधं दिग्बलं लिख्यते

(margin notes: द्वय; ॥१६॥; श्रा; यथा; ना; राशौ; तमा दिकेन स्वगुणितं)

जन्मकालिनं नतं २११।०।३ इदं द्विगुणितं जातं २

स्पष्टं॥ उदाहरणं॥ जन्मकालिनमुन्नतं ८।३० इदं द्विगुणितं जातं रविगुरुशुक्राणां कलादिनक्तबलं १।५० रूपस्थाने शून्य

रूपादिक्रं ०।१।१० ५८

युक्तं जातं चंद्रभौममन्दानां कलादिनक्तं दिवाबलं ४।३।१० रूपस्थाने शून्ययुक्तं जातं रूपादि ०।४।१० बुधस्य सदा षष्ठि

कलाबलं ६०॥ अथ पक्षबलार्थं शुभपापग्रहानुपजातिकयाह॥ शुक्ले तु सौम्येज्यसिताः शुभाः स्युः कृष्णे तु सूर्या

र्किकुजाः खलाश्च॥ खलेयुतश्चंद्रसुतः खलः स्याच्छुभः त्राशी पक्षबले तथा ऽसः॥२८॥ शुक्ले तु सौम्येज्यसिताः शु

क्ले तु शुक्लपक्षश्चन्द्रः सौम्यो बुधः ईज्यो गुरुः सितः शुक्र एते शुभाः स्युः॥ चेत्सपरः कृष्णे तु सूर्यार्किकुजाः कृष्णे तु

कृष्णपक्षश्चन्द्रः सूर्यः प्रसिद्धः आर्किः शनिः कुजो भौमः एते खलाः पापाः स्युः खल

नखलाभ्यां खलैः पापैरन्वितश्चन्द्रसुतो बुधः खलः स्यात्॥ अथ पक्षे त्राशी तथा

ज्ञः बुधः सदा शुभ एव स्यात् शुक्लः कृष्णपक्षौ चन्द्रस्य वृद्धिक्षयतो ज्ञेयौ॥ ननु पंच

मीतः अत्र पक्षबले केचित्कृष्णपक्षे चन्द्रपापयुक्तं बुधं च पापग्रहमिच्छन्ति वनेद

सत्॥ यत एवं सप्तमीतश्चन्द्रस्य पक्षबलं रूपमितं स्यात्॥ सूर्यद्वारयनोस्य पक्ष

जबले चेष्टाबलस्त क्रमादिति वक्ष्यमाणं चेष्टाबलमपि चन्द्रस्य पक्षबलं

